**संस्कृतवार्ता:**

**दिनाङ्क :-07.04.2025**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री - तमिलनाडु</u>**

रामनवमीपर्वण: शुभावसरे ह्य: प्रधानमन्त्री नरेन्द्रमोदी तमिलनाडुराज्यस्य नवीन पम्बन-रेल-सेतो: उद्घाटनं विहितवान्। प्रधानमन्त्रिणा तमिलनाडौ त्रिशतकोट्यधिकाष्ट-सहस्ररुप्यकाणां विभिन्नानां विकासात्मक रेल-मार्ग-परियोजनानानम् अधारशिला च संस्थाप्य राष्ट्राय समर्पिता। तेनोदीरितं यत् तमिलनाडो: विकास: राष्ट्रस्य विकासे योगदानमस्ति। परियोजनेयं रामनवम्यां उपहारवद् वर्तते इति असौ उल्लिखितवान्। सममेव संगम-साहित्ये भगवत: रामस्य उल्लेखम् असौ अकरोत्। तेनोक्तं यत् अस्मिन् दिवसे प्राचीन रामेश्वरम् मंदिरे पूजा-अर्चना अपि च परियोजनाया: समर्पणं च अलौकिक क्षणवत् अस्ति।

**बाइट - पीएम मोदी - रामेश्वरम् प्रोजेक्ट**

अयं रेलसेतु: वास्तुकलाया: एक: अद्भुत: प्रतिदर्शो विद्यते यो हि देशस्य प्रथम: वर्टिकललिफ्ट इति ऊर्ध्वाधरोन्नयन-सागरीयसेतु: अस्ति। असौ तावत् अस्याद्वितीयकार्यस्य कृते निर्माणकर्तृभ्य: च धन्यवादज्ञापनं विहितवान्। श्रीमोदी उक्तवान् यत् अनया परियोजनया व्यापार:, पर्यटनं च वर्धिष्यते अपि च जनेभ्य: वृत्यवसरा: लप्स्यन्ते।

**<u>राष्ट्रपति-पुर्तुगालयात्रा:</u>**

राष्ट्रपतिः द्रौपदी मुर्मु: पुर्तगाल-स्लोवाकिया-देशयोः राजकीययात्रायाः प्रथमे चरणे लिस्बन्-नगरं सम्प्राप्तवती। पुर्तगालदेशस्य स्व यात्रावधौ राष्ट्रपतिः मुर्मु:

स्वसमकक्षेण राष्ट्रपतिना मार्सेलो रेबेलो डी सूसा इत्यनेन सह मिलित्वा प्रतिनिधिमण्डलस्तरस्य वार्ताम् करिष्यति। सा पुर्तगालस्य प्रधानमन्त्री लुईस् मोंटेनेग्रो, राष्ट्रियसभायाः अध्यक्षः जोस पेड्रो अगुइर्-ब्रेन्को इत्युभाभ्यां सह मेलनं करिष्यति। स्लोवाकियादेशे राष्ट्रपतिः मुर्मुः स्लोवाकियादेशस्य राष्ट्रपतिना पीटर पेलेग्रिनी इत्यनेन, प्रधानमन्त्रिणा रोबर्ट् फिको इत्यनेन च सहापि द्विपक्षीयोपवेशनं करिष्यति।

**<u>विश्वस्वास्थ्यदिवस:</u>**

स्वास्थ्यजागरूकताया: सम्वर्धनाय अद्य सम्पूर्णे विश्वे विश्वस्वास्थ्यदिवसः आचर्यते। अयं दिवसः प्रतिवर्षं आचर्यते, प्रतिवर्षं च विश्वस्य जनानां समाह्वानपूर्णे विशिष्टस्वास्थ्यविषये ध्यानं आकर्षयति। अष्टचत्वारिंशोत्तर ऊनविंशतितमेवर्षे अप्रैल-मासस्य सप्तमे दिनाङ्के विश्वस्वास्थ्यसङ्गघनस्य स्थापनायाः वार्षिकोत्सवः अस्ति। अस्मिन् वर्षे विश्वस्वास्थ्यदिवसस्य विषयः "स्वस्थयुत: आरम्भ : आशान्वितं -भविष्यम् इति अस्ति। रोगानाम्, मानसिकस्वास्थ्यसमाह्वानानां, निवारकपरिचर्यायाः महत्त्वस्य च विषये जागरूकतायाः वर्धनेन सह सम्पूर्णे विश्वे स्वास्थ्यं सर्वोच्चप्राथमिकतारूपेण उद्भूतम् अस्ति।

**<u>आईएसएसएफ विश्वकप:</u>**

पूर्वविश्वविजेता रुद्राक्ष बालासाहेब पाटिलः ह्यः पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य ISSF विश्वचषक ब्यूनस आयर्स इत्यस्यां पुरुषाणां दश मीटर-एयर राइफलशूटिंग् इत्यस्यां स्पर्धायां स्वर्णपदकं प्राप्तवान्। इदं ISSF विश्वचषक स्पर्धायां रुद्राक्षपाटिलस्य द्वितीयं स्वर्णपदकं अस्ति।

**आई.पी.एल्.स्पर्धा**

आईपीएल विंशतिः प्रति विंशतिः इत्यस्यां क्रिकेट्-मालिकायां गतरात्रौ गुजरात-टाइटन्स्-दलेन हैदराबाद-नगरे सनराइजर्-हैदराबाद-दलं सप्तस्तोभैः पराजितम्। अद्य मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे मुम्बई-इण्डियन्स्-दलं रॉयल-चैलेन्जर्स्-बेङ्गलूरु-दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति।